# आर्य अनित्यता सूत्रम्

## ॐ नमः सर्वज्ञाय

एवं मया श्रुतम्। एकस्मिन् समये भगवान् श्रावस्त्यां विहरति स्म जेतवने अनाथ पिण्डदस्यारामे महता भिक्षुसंघेन त्रयोदशाभिर्भिक्षुशतैः।

तत्र खलु भगवान् भिक्षूनामन्त्रयते स्म।

अनित्या भिक्षवः सर्वसंस्कारा अध्रुवा अनास्वासिका विपरिणाम धर्माणः। अद्यावत् भिक्षवः सर्वेभ्यः संस्कारेभ्यो अलं निर्वर्तितुमलं विरत्तमलं विमोत्तुम्। सर्वेषां सत्त्वानां सर्वेषां भूतानां सर्वेषां प्राणिनां आमरणान्त हि जीवित मरण पर्यवसानं नास्ति जातस्यामरणम्।

येपि ते भिक्षवो गृहपतयो महाशालकुला ब्राह्मण महाशालकुलाक्षत्रिय महाशालकुला आशां महाधनो महाभोगाः प्रभूतमणिमाणिक्य मुक्ता वैदूर्य शंखशिला प्रवाल जातरूपरजतविकरणाः प्रभूतधनधान्यकोष कोष्ठागारसन्निचयाः प्रभूतदासीदासकर्मकर पौरूषेयो प्रभूतमित्रामात्यज्ञातिसालोहितास्तेषामपि मरणान्तं जीवितमरणंपर्यवसानं नास्ति जातस्यामरणं।

येपि ते भिक्षवः राजानः क्षत्रियाश्च मूर्द्धाभिषिक्ता जानपदैश्वर्यस्थामवीर्यमनुप्राप्ता महान्तं पृथ्वीमण्डल– मभिनिर्जित्या वसन्ति। तेषामपि मरणान्तं हि जीवितं मरणपर्यवसानं नास्ति जातस्यामरणं।

येपि ते भिक्षवः ऋषयो वानप्रस्थाः प्रमुक्त फलाहाराः प्रभूक्तफल भोजिनः प्रमुक्त फलेन यापन्ति तेषामपि मरणान्तं हि जीवितं मरण पर्यवसानं नास्ति जातस्यामरणं।

येपि ते भिक्षवः कामावचार देवाश्चातुर्महाराजिका देवास्त्रयास्त्रिंशादेवा नामास्तुषितादेवा निर्माणरतयोदेवाः परनिर्मितवशवर्तिनोदेवास्तेषामपि मरणान्तं हि जीवितं मरण पर्यवसानं नास्ति जातस्यामरणं।

येपि ते भिक्षवो रूपिणो देवाः प्रथमध्यानलाभिनो ब्रह्मकायिका ब्रह्मपुरोहिता महाब्रह्माणः द्वितीय ध्यानलाभिन परीताभा अप्रमाणाभा आभाश्वरा स्तृतीयध्यान लाभिनः परीतशुभा अप्रमाणशुभा शुभकृत्स्ना चतुर्थध्यान लाभिनोनभ्रका पुण्यप्रसवा बृहत्फला अवृहा अतपा सुदृशाः सुदर्शना अकनिष्ठाश्चदेवास्तेषामपि मरणान्तं हि जीवितं मरणं पर्यवसानं नास्ति जातस्यामरणं।

येपि ते भिक्षवः आरूपिणोदेवा आकाशानन्तायतनोपगा विज्ञानन्त्यायतनोपगा आकिंचन्यायतनोपगा नैवसंज्ञानासंज्ञायतनोपगाश्च देवास्तेषामपि मरणान्तंहि जीवित मरणं पर्यवसान नास्ति जातस्यामरण। त्रैधातुकमिदं।

येपि ते भिक्षवोऽर्हन्तः क्षीणास्रवा कृतकृत्याः कृतकरणीया अपहृतभारा अनुप्राप्तस्वाकाथा परिक्षीणभवसंयोजनः सम्यगाज्ञासुविमुक्तचित्ताः सर्वचेतोवशि परमपारमिता प्राप्तस्तेषामपि कायनिक्षेपणधर्माः।

येपि ते भिक्षवः प्रत्येकबुद्धाः खड्ग विषाणकल्पा एकमात्मान दमयन्ति एकमात्मान शमयति एकमात्मात्मानंपरिनिर्वायन्ति तेषामपिऽयं कायोनिक्षेपणधर्मः।

येपि ते भिक्षवस्तथागता अर्हन्तः सम्यक्संबुद्धादशबलवलिनः उदारार्षमाः सम्यक् सिंहनादनादिनेश्चतुर्वैशारद्य धर्मारोहण वैशारद्यं। सर्वधर्मदेशनावैशारद्यं निर्वाणमार्गवतारणवैशारद्यं आश्रवज्ञान प्रहाणा वैशारद्यं।

विशदादृढनारायणसंहतकायास्तेषामप्ययंकायोनिक्षेपण धर्मः। तद्यथापि नाम भिक्षवः कुम्भकारकृतानि भाण्डानि आमानिवापक्वानि वा भेदनपर्यन्तानि भेदन पर्यवसानान्येवमेव भिक्षवः सर्वेषां सत्त्वाणां सर्वेषां भूतानां प्राणिनां आमरणान्तं हि जीवित मरणपर्यवसानं नास्ति जातस्यामरणं। ईदमवोचद् भगवान्निदमुक्तो सुगतो ह्यथा परोवाच शास्ता।

अनित्यावत संस्कारा उत्पाद् व्ययधार्मिणः।
उत्पाद्यहिनिरूध्यन्ते तेषांव्यपशमः सुखं।
यथा हि कुम्भकारेण मृतिकाभाजनं कृतं।
सर्व भेदन पर्यन्तं सत्त्वानांजीवितंतथा।
यथाफलानां पक्वानांशश्वत्पतनतोभयं।
तथा संस्कारजाः सत्त्वा नित्यं मरणतो भयं।
सर्वेक्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगाश्च वियोगान्ता मरणान्तंहि जीवितम्।
इदमवोचद् भगवानात्तमतास्ते च भिक्षवः सा च पर्षदोभगवतो भाषितमभ्यनन्दन्।

इत्यार्यानित्यता सूत्रं समाप्तं।